# संस्कृत-वार्ताः

**दिनाङ्कः-26.04.2025**

**सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्य-श्रव्य परान्तर्जालीय माध्यमेन विविधेषु सर्वकारीयविभागेषु संघटनेषु च नवनियुक्तेभ्य: युवभ्य: एकपंचाशत्सहस्राणि नियुक्तिपत्राणि वितरितवान्।
- प्रशासनेन विमानसेवाभ्य: निर्देश: प्रदत्त: यत् वायुक्षेत्राणां प्रबन्धानां मध्ये यात्रिण: नियन्त्रणोपायान् सुनिश्चेतुं निर्देश: प्रदत्त: येन यात्रिणां सौविध्यं-सुरक्षा-विनियामका-नुपालानानां सुनिश्चितता भवेत्।
- संयुक्तराष्ट्रसंघस्य सुरक्षापरिषद: जम्मू-कश्मीरस्य पहलगाम-नगरे भयोत्पादक-आक्रमणस्य दृढ़तया निन्दा कृता।
- आकाशवाण्या पंचविंशत्युत्तर द्विसहस्रतमवर्षस्य इंडिया ऑडियो समिट एंड अवॉर्ड्स इत्यस्मिन् विभिन्नश्रेण्यां षड्पुरस्काराः विजिताः।
- पोप-फ्रांसिस्- इत्येतस्य अन्त्येष्टि-संस्कारः सेण्ट्-पीटर-स्वायर इत्यत्र प्रचलति, यत्र विश्वस्य नेतारः, गणमान्यजनाः, सहस्रं यावत् श्रद्धालवः च उपस्थिताः सन्ति।

- **अपि च**
  - आई.पी.एल्. इत्येतस्यां विंशतिप्रतिविंशतिक्रिकेट्-स्पर्धा-मालिकायाम् अद्य, कोलकाता-नाइट-राइडर्स-पञ्जाब-किंग्स-दलयोर्मध्ये सामुख्यं भविष्यति।

## अथ वार्ताः विस्तरेण

## प्रधानमंत्री रोजगार मेला

कुर्वन्ति यदा युवकाः राष्ट्रनिर्माणं तदा भवति राष्ट्रस्य द्रुतगत्या विकासः अपि च विश्वस्मिन् हि विश्वे स्वकीयं कीर्तिपताकां स्थापयति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितम् । सः अवोचत् यत् देशस्य युवकाः स्वस्य परिश्रमेन नवान्वेषणेन च देशस्य कियती क्षमता अस्ति इति विश्वं दर्शयन्ति ।प्रधानमन्त्री नरेन्द्रमोदी अद्य-दृश्य-श्रव्य-परान्तर्जालीय माध्यमेन विविधेषु सर्वकारीयविभागेषु संघटनेषु च नवनियुक्तेभ्य: युवभ्य: एकपंचाशत्सहस्राणि नियुक्तिपत्राणि वितरितवान्। श्री मोदी अवोचत् यत् ये युवका: नियुक्ति पत्रं प्राप्तवन्त: तेषामुपरि देशस्य आर्थिकव्यवस्थां सुदृढां कर्तुं दायित्वम् अस्ति। देशे आधुनिकसंरचनायाः निर्माणस्य दायित्वम् अस्ति।

मुम्बई-नगरे विश्व-दृश्य- श्रव्य मनोरञ्जन-शिखरसम्मेलनं वेव्स् इत्यस्य विषये अपि प्रधानमन्त्री अवदत् यत् देशस्य युवकाः अपि अस्य आयोजनस्य केन्द्रस्थाने सन्ति इति। श्री मोदी वर्यः अवदत् यत्, देशस्य महिलाः प्रशासनिक, अन्तरिक्ष, विज्ञानक्षेत्रेषु च नूतनं औन्नत्यं प्राप्तवत्यः सन्ति।

सम्प्रति सर्वकार: ग्रामिण महिलानां सशक्तिकरण दिशि कटिबद्ध: वर्तते।

वृत्यवसर-सृजन-क्षमतायै सर्वोच्च प्राथमिकतां प्रदातुं प्रधानमन्त्रिणः प्रतिबद्धतानुरूपम् अयं हि पंचदशम: वृत्त्यवसर-मेलक: अशेषे हि देशे सप्तचत्वारिंशत्स्थानेषु आयोजित:।

## पुरी-वृत्यावसर-मेलापक

केन्द्रीयमन्त्रिणा हरदीपसिंहपुरिणा उक्तं यत्, पहलगाम इव आतङ्कवादीनां आक्रमणं जीवनाधिकारस्य विरुद्धम् अस्ति, अस्याक्रमणस्य निन्दा भवेदेव। श्रीपुरी: अद्य मोहालीनगरस्य अमेटीविश्वविद्यालये पञ्चदशतमे वृत्यावसर मेलापके सम्मिल्य वार्ताहरैः सह चर्चायां मन्त्री उक्तवान् यत्, इदम् आक्रमणं एतादृशेन देशेन अभवत् योहि आतङ्कवादस्य उपयोगं राज्यनीतेः साधनरूपेण करोति। तेन आश्वासितं यत् तस्य योग्यं उत्तरं प्रदास्यते ।

मन्त्रिणा पञ्चविंशति जनेभ्य: सर्वकारीयक्षेत्रेषु नियुक्तिपत्राणि वितरितानि।

## प्रशासनं-विमानसेवा:

प्रशासनेन विमानसेवाभ्य: निर्देश: प्रदत्त: यत् वायुक्षेत्राणां प्रबन्धानां मध्ये यात्रिण: नियन्त्रणोपायान् सुनिश्चेतुं निर्देश: प्रदत्त: येन यात्रिणां सौविध्यं-सुरक्षा-विनियामका-नुपालानानां सुनिश्चितता भवेत्। नागरिकोड्डयन मन्त्रालयेन उक्तं यत् सद्य: एव अन्ताराष्ट्रिय वायुक्षेत्रस्य पिधानानन्तरं अत्योड्डयन-प्रतिबन्धानां च आलोके अनेकेषु उड्डयनमार्गेषु महत्वपूर्णं परिवर्तन कृतमस्ति। येन उड्डयनावधि: विस्तृत: अभवत्, तकनीक्यावरोधस्य अपि सम्भावना विद्यते। मन्त्रालयेन उक्तं यत् कस्यापि अवरोधस्य विषये तत्क्षणमेव सूचयन्तु अपि च विमानेषु सर्वविध-आवश्यक-व्यवस्था: कुर्वन्तु।

**इरान-विस्फोटः**

दक्षिण-ईरानस्य बन्दर-अब्बास-नगरे शाहिद-राजाई-पत्तने अद्य विशाल-विस्फोटे चतुःशततोप्यधिकाः जनाः व्रणिताः। स्थानीय-वार्ता-वाहिन्यानुसारं विस्फोटः शाहिद-राजाई-पत्तने संगृहीतेषु अनेकेषु कंटेनर इति संग्रहपात्रेषु अभवत्। ओमानदेशे इरान्-अमेरिका-देशयोः मध्ये परमाणुवार्तायाः तृतीयचक्रस्य आरम्भे एषः विस्फोटः अभवत् ।

**संयुक्तराष्ट्रसंघस्य**

संयुक्तराष्ट्रसंघस्य सुरक्षापरिषद: जम्मू-कश्मीरस्य पहलगाम-नगरे भयोत्पादक-आक्रमणस्य दृढ़तया निन्दा कृता। परिषद: सदस्या: अवोचन् यत् आतंकवद: वैश्विकशांतये बृहत्तमं भर्त्सनं वर्तते। एतदर्थं अस्य सर्वविध: विरोध: करणीय: एव। परिषद: पहलगाम-आक्रमणे ये अपराधिन: सन्ति: ये समर्थका: सन्ति अपि च ये प्रयोजका: सन्ति सर्वेऽपि दण्डनीया: इति आह्वानं कृतम्।

**आकाशवाणी पुरस्कार:**

आकाशवाण्या पंचविंशत्युत्तर द्विसहस्रतमवर्षस्य इंडिया ऑडियो समिट एंड अवॉर्ड्स इत्यस्मिन् विभिन्नश्रेण्यां षड्पुरस्कारा: विजिता:।

**पोप-अन्तिमसंस्कारः**

पोप-फ्रांसिस्-इत्येतस्य अन्त्येष्टि-संस्कारः वैटिकन-नगरस्य सेण्ट्-पीटर- स्वायर इत्यत्र अभवत्, यत्र विश्वस्य नेतारः, गणमान्यजनाः, सहस्रं यावत् श्रद्धालवः च उपस्थिताः आसन् वैश्विकरोमनकैथोलिकचर्च इत्यस्य प्रमुखस्य अन्त्येष्टिः रोमनगरस्य सेण्ट् मेरी मेजर इत्यस्य बेसिलिकायां अभवत्। अन्त्येष्टि-संस्कारस्य आरम्भः भारतीयमानकसमयानुसारी अपराह्ने सार्धैक वादने अभवत्। अस्मिन् समारोहे एक दशमलव पञ्च लक्षाधिकाः जनाः उपस्थिताः सन्ति। राष्ट्रपतिः, प्रधानमन्त्री, राज्ञः परिवारः, धार्मिकनेतारः च पोप-फ्रांसिस्-वर्याय अन्तिम-श्रद्धांजलिम् अर्पयितुं एकत्रिताः सन्ति। राष्ट्रपतिः द्रौपदी मुर्मू भारतस्य सर्वकारस्य, जनानां प्रतिनिधी रूपेण श्रद्धाञ्जलिम् अर्पितवति।

**'मन की बात'-कार्यक्रम:**

प्रधानमन्त्री नरेन्द्रमोदी श्व: एकादशवादने स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। 'मन की बात' इत्यस्य मासिक-कार्यक्रमस्य इदम् एकविंशत्यधिकैकशततमं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाणी-दूरदर्शनयो: सर्वाभिः वाहिनीभिः भविष्यति। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अयं कार्यक्रमः क्षेत्रीय-भाषासु अपि प्रसारयिष्यते।

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: श्व: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

## आई.पी.एल्.

आई.पी.एल्. इत्येतस्यां विंशतिप्रतिविंशतिक्रिकेट्-स्पर्धा-मालिकायाम् अद्य, कोलकाताया: ईडेन-गार्डन्स-क्रीडाङ्गणे कोलकाता-नाइट-राइडर्स-पञ्जाब-किंग्स-दलयोर्मध्ये सामुख्यं भविष्यति। क्रीडाया: आरंभ: सायं सार्ध सप्तवादने भविष्यति। गतरात्रौ एम्.ए. चिदम्बरम्-क्रीडाङ्गणे सनराइजर्स-हैदराबाद-दलेन चेन्नै-सुपर-किंग्स-दलम् पञ्चक्रीडकानां हानिपुरस्सरम् पराजितम्।

**॥ इति वार्ता: ॥**